३०. शतचण्डी + सहस्रचण्डी-
प्रयोगविधि:- पत्र. २०.२५०

1334

10"x5"

अ५

पुस्तकशानचंडीकीपत्रसंख्या २०

चितरै २

श्रीगणेशायनमः भास्करायनमः अथशतचंडीसहस्रचंडीप्रयोगः नत्वागणेशश्व
शुद्देवौराघवंशिवम् एमलेस्मृतनूजेनकमलाकरशर्मणा डामरंयामलंचैवयोगिनी
तंत्रमेवच १ वाराहीतंत्रमन्यांश्चग्रंथानालोक्ययत्नतः सहस्रचंडीकायाश्चश
तचंड्यास्तथैवच २ नेवाणीन्यासविधिनाप्रयोगःप्रोच्यतेऽधुना तत्रयजमानःशु
भदेशेमंडपंविकीर्णगणेशकूर्मशेषवसुधानांपूजनंकृत्वाशतचंड्यांषोडशहस्तंस
हस्रचंड्यांविंशतिहस्तंमंडपंप्रसाध्यतत्पश्चिमेयस्तंभावटेवापूर्वोक्तदेवानांपूजांकृ
त्वातान्नपात्रेषुमाल्हयजेत् मन्त्राः भवनीगतवांश्रुगणसर्वकल्याणिवसुधेलोकधा
रिणि उद्धृतासिवराहेणसशैलवनकानने मंडपंकारयाम्यद्यत्वदूर्ध्वशुभेस्थ

हमार पं

कोणम् गृहारम्भार्थं मया दत्तं प्रसन्नो शुभदो भवेति भूम्यां अर्घं दत्वा मंडपं विधाय
तन्मध्ये ईशान्यां मानदण्डं अंगुलं वा प्राग्वत् वेदिं कृत्वा पश्चिमे शतचंडां द्विहस्तं सहस्रचंडां चतुर्
हस्तं षट्हस्तं वा चतुरस्रं पद्मकुंडं वा कुर्यात् तत्राष्टाचत्वारिंशदंगुलानि चतुर्हस्ते करणीं अ
ष्टपंचाशदंगुलानि सप्तयवा सूक्ष्माष्टयवं च षट्हस्ते करणीं एवं कुंडं कृत्वा मंडपमध्ये अष्टको
णं वेदिं कुर्यात् तद्यथा मध्यस्तम्भचतुष्कमध्ये समचतुरस्रं कृत्वा षोडशहस्तमंडपे अष्टा
दशांगुलैर्विंशतिहस्ते चतुर्विंशत्यंगुलाधिकहस्तेन कोणसूत्रमयतो कथयित्वा अष्टसूत्रदानादष्टास्रमि
ति राघवभट्टोक्तप्रकारः अथवा षोडशांगुलाधिकहस्तमात्रं मध्ये चतुरस्रं कृत्वा तत्संलग्नानि
चतुर्दिक्षु तन्मानानि चत्वारि चतुरस्राणि कृत्वा बाह्यचतुरस्राणां कोणेषु कोणाया सूत्राणि
दत्वा दिक्षु चतुरस्र चतुर्थांशस्य त्यजेदित्यष्टास्रिः एवमष्टकोणं हस्तोच्चां वेदिं कृत्वा तदुपरि

श्रा॰चं॰

२

वारुणमंडलंसर्वतोभद्रंवाकृत्वोपरिविज्ञानकिंकिरणीचामरादियुतंवध्वाशतच्छिद्रांजलेनत
दर्धेनतदर्धेनवासहस्रच्छिद्रांतुपलपंचकेनतदर्धेनवादेवीमूर्तिमष्टदशभुजांकुर्यात् अथ
प्रयोगः शुभेन्हिकृतोसपत्नीकस्तिलतैलेनकृताभ्यंगोभूषितः संपूर्णकलशहस्तोभद्रकर्णि
मिरितिमंडपंप्रदक्षिणीकृत्यपश्चिमद्वारेणप्रविश्योपविश्यदेशकालौस्मृत्वाममेहजन्म
निदुर्गाप्रीतिद्वारासर्वापच्छांतिपूर्वकदीर्घायुर्विपुलधनकार्यसिध्यर्थंपुत्रपौत्राद्यन
वच्छिन्नसंततिवृद्धिस्थिरतिकर्तौलक्ष्मीकीर्तिलाभशत्रुपराजयसदभीष्टसिध्यर्थंममा
मुककार्यसिध्यर्थंवासनवग्रहमखंवाशतचंडींवास्वयंब्राह्मणद्वाराकरिष्ये तदंगतया
गणेशपूजनंपुण्याहवाचनंमातृकापूजनंनांदीश्राद्धंचकृत्वाचार्यंकृत्वाप्रार्थयेत्
आचार्यस्तुयथास्वर्गेशक्रादीनांबृहस्पतिः तथात्वंममयज्ञेऽस्मिन्नाचार्योभवसुव्रत

शिव

२

ज

नेति ततो ब्रह्माणं पृष्ट्वा यथा चतुर्मुखो ब्रह्मा स्वर्गलोके पितामहः तथा त्वं मम यज्ञेऽस्मिन् ब्रह्मा
भव त्वामहं वृणे इति प्रार्थयेत् ततः सदस्यगणेशजपार्थं च वृत्वाऽस्मिन् कर्मणि ऋत्विक् त्वं
न त्वामहं वृणे इति शतं चं ज्ञान वेदमृत्विजो वरणात् सहस्रं चं ज्ञात्वा ततोऽष्टौ द्वार
न पालान् पृष्ट्वा संभवे सर्वेषां मधुपर्कपूजां पृष्ट्वांगुलीयकर्णवस्त्रद्वयजलपात्रासनानां
पात्राणि दद्यात् द्वितरणमा[illegible]चार्याय अथाचार्यो यदत्र संस्थितं भूतमिति सर्षपान्
विकीर्य पंचगव्येन कुशैः शुचीवो हव्या इति [illegible]चेनापो हि ष्ठेति च नमेन मंडपं प्रोक्ष्य स्वस्त्ययनं ता
प१ र्क्ष्यमिति मंत्रद्वयं पठेत् ततो मल्लं तनुलोद्धृति मार्गेण मंडपपूजां प्रागग्निस्थापनां कुर्यात्
ततः पूर्वकाद्यं देवारि गजारूढ वज्रहस्त एह्येहि प्राग गच्छ गंधपुष्पसहितमिमं क्षीरान्नबलिं गृहा
ण मम [illegible]प्सितं कुरु स्वाहेति बलिं दत्वा द्वारेशगणयोर्ब्रह्मेशीं माहेश्वरीं वि[illegible]मो मायाशक्तये

ए.चं.
२

धैत्रेविधात्रेशंषनिधयेपद्मनिधयेह्वरम्भियेनमः इति संपूज्याधवास्तुपुरुषमसितांगभैरवंच
पूजयेत् ततआग्नेयेउंकेअजारूढशक्तिहस्तेएह्येहिइत्यादिरुरुभैरवञ्च दक्षिणेकालि
महिषारूढंदंडहस्तेएह्येहिइत्यादिह्वरशाखयोःकौमारीवैष्णवीपूर्ववत्चिच्छक्त्यादीन्सं
पूज्य चंडभैरवंपूजयेत् ततोनैरृत्यांरक्तांविप्रेजारूढंखड्गहस्तेएह्येहिइत्यादि ह्वरशा
खयोःकौमारींवैष्णवींपूर्ववत्क्रोधभैरवंच ततःपश्चिमेवारिअश्वारूढपाशहस्तेएह्येहीत्यादि
ह्वरशाखयोःवाराहीमिंद्राणींचिच्छक्त्यादींश्चसंपूज्यउन्मत्तभैरवंपूजयेत् ततोवायव्ये
मृगवाहनींअंकुशहस्तेएह्येहीत्यादिकपालभैरवञ्च ततोत्तरेयक्षिणिसिंहवाहिनीगदा
हस्तेएह्येहीत्यादिह्वरशाखयोःचामुंडामहालक्ष्मीचिच्छक्त्यादीन्संपूज्यभीषणभै
रवंपूजयेत् ईशान्यांकालिवृषभारूढशूलहस्तेएह्येहीत्यादिसंहारभैरवञ्च ईशानपूर्व

पि२

सं
शिव
२

योर्मध्येसर्वराज्ये अहिवाहने चक्रहस्ते एह्येहि मारि भूमिपूजा च पश्चिमनैरृत्ययोर्मध्ये सुरश्रे
ष्ठे हयवाहने अक्षसूत्रकमंडलुहस्ते एह्येहि मारि अंतरिक्षपूजा च ततो वेघामन्तये विद्मवे
पूर्वे रुद्रायेशान्यां ब्रह्मणे पश्चिमे गणेशाय मध्ये महाकाल्यै महालक्ष्म्यै महासरस्वत्यै च ध्वजमु
पाताको छत्रपरं च बद्ध्वा पूजयेत् अथाचार्यो गृहे वेघामहासंस्थाप्य सपूज्य मध्ये वेघापी
ठे उपविश्य गं गुरवे० गणपतये नमः वाराह्यै दुं दुर्गायै नमः क्षं क्षेत्रपालाय नमः हुं
अस्त्राय फट् इति वास्तुपुरुषाय महालक्ष्म्यै नमः इति नत्वा पृथ्वीमासनं कृत्वा अनंतासनाय
विमलासनाय पद्मासनाय नमः इति नत्वा अपसर्प्पन्तु भूतानि अपसर्पन्तु ये भूता इति कृष्णा
वामपादघातत्रयं कृत्वा हुं अस्त्राय फट् इति तालत्रयं कृत्वा गणपति सरस्वती क्षेत्रपालां
नत्वा रः फट् इति वह्निप्राकारं विचिन्त्य समन्ताज्जलधारां दत्वा मूलेनाचम्य प्राणानायम्य

देशकालौसंस्मृत्वास्मिन्शतचंडीकर्मणिश्रीमहालक्ष्म्याःनवार्णविधानेनमास
पूजादिकरिष्ये इतिसंकल्प्यभूतशुद्धिंकुर्वीत स्वजीवंहंसःसोहमितिशिरःस्थितप
रमात्मनिसंयोज्यपादाद्याजानुलंपृथ्वीमप्सुसंहरामीतिसर्वत्रानुषंगः जान्वाद्या
भ नाभिंवा आपस्तेजसिनाभेराकंठं जठरंतेजोवायौकंठाद्याभ्रूमध्यंवायुमाका
शेभ्रूमध्याद्ब्रह्मरंध्रंहं आकाशमहंकारेहंकारंमहतिमहांतंप्रकृतौप्रकृतिंपुरुषे
पुरुषंपरमात्मनिमहालक्ष्मीसंज्ञेब्रह्मणिसंहरामीत्यमुखेनभूतानिसंहृत्यवाम
कुक्षौवंगुष्ठमात्रंपापपुरुषंयमितिपूरकेण १६ संशोष्यरमितिअग्निबीजेनकुंभकेन
६४ दग्ध्वावमितिरेचकेन ३२ निःसार्यवमित्यमृतबीजेनाप्लाव्यलमितिसमेल्य शिव
म्लोमितिघनीकृत्यहमितिव्योमबीजेनदेहावयवान्ध्यात्वाजीवंहंसःसोहंहंसइति ४

तत्रसंयोज्यब्रह्मणः प्राकृतिः प्रकृतेर्महान्महतोहंकारोहंकारादाकाशआकाशाद्वायुःवायो
रग्निरग्नेरापोद्भ्यः पृथिवीपृथिव्याः ओषधयः ओषधीभ्योन्नमन्नाद्रेतोरेतसः पुरुषइ
तिदेहेतत्त्वंविभाव्यप्राणप्रतिष्ठांकुर्यात् प्राणप्रतिष्ठामंत्रस्यब्रह्माविष्णुरुद्राः ऋष
यः ऋग्यजुः सामानिछंदांसिचेतनस्वरूपिणीजगत्स्रष्टिकर्त्तीप्राणशक्तिर्देवताआं
बीजंह्रींशक्तिः क्रौंकीलकंप्राणप्रतिष्ठापनेविनियोगः ॐ आंह्रींक्रौंश्रैंकँखँङं पृथि
व्यप्तेजोवायवाकाशात्मने आं अंगुष्ठाभ्यांनमः ॐ ईं शब्दस्पर्शरूपरसगंधात्म
नेईंतर्जनीभ्यां ॐ उं श्रोत्रत्वक्चक्षुर्जिह्वाघ्राणात्मनेउंमध्यमाभ्यांनमः ॐ एंत्वंवा
क्पाणिपादपायूपस्थां ॐ अंमनोबुध्यहंकारचितात्मनेअः करतलकरपृष्ठाभ्यां
नमः एवंषडंगः ॐ मनेऐंअनामिकाभ्यांनमः ॐ पं वचनादानविहरणोत्सर्गानंदात्मनेऔं

श्री नो

कनिष्ठिकाभ्यां नमः ॐ आं ह्रीं क्रौं यं रं लं वं शं षं सं हं हंसः सोहं क्रों ह्रीं आं मम प्राणा इह प्राणा
पुनरेवं मम जीव इह स्थितः पुनरेवं मम सर्वेन्द्रियाणि पुनरेवं मम वाङ्मनश्चक्षुः श्रोत्र जि
ह्वा घ्राण प्राणा इहागत्य स्वस्तये सुखेन सुचिरं तिष्ठन्तु स्वाहेति शिरसि हृदि वा त्रिः सकृद्वा
जपित्वा पंचदश वारं प्रणवं जपेत् संस्कारान् भावयेत् अथ मातृकान्यासः अस्य मा
तृकामंत्रस्य ब्रह्मा ऋषिर्गायत्री छंदः मातृका सरस्वती देवता हलो बीजानि स्वराः शक्त
यः क्षं कीलकं न्यासे विनियोगः अं कं ५ आं अंगुष्ठाभ्यां नमः इं चं ५ ईं तर्जनीभ्यां नमः
उं टं ५ ऊं मध्यमाभ्यां नमः एं तं ५ ऐं अनामिकाभ्यां नमः ओं पं ५ औं कनिष्ठिकाभ्यां नमः
अं यं क्षं अः करतलकरपृष्ठाभ्यां नमः एवं हृदयादि पंजानूनाभौ दशदले डादि फांतान् शिवः
तद५धः षट्दले वादि लांतान् आधारे चतुर्दले वादि सांतान् ललाटे द्विदले हं क्षं इति ५

नमातृका अथ बहिर्मातृकान्यासः अं ष्यादिषडंगांतं पूर्ववत् अं नमः शिरसि आं नमो मुख
वृत्ते नेत्रकर्णनाशापुटकपोलदंतपंक्त्योष्ठ हृदेषु इ ई उ ऊ ऋ ॠ लृ ॡ ए ऐ ओ औ इति न्यसेत्
अं जिह्वायां अः कंठे दक्षकरसंध्यग्रेषु करगौ वामकरे च वर्गः दक्षिणवामपादयोः वर्गौ कु दि
क्षि ह्यं पपृष्ठनाभ्युदरेषु पवर्गः पं हृदि ह्रं कंठले कं कुदि वं स्कंधयोः शं हृदादिदक्षकरे षं हृदा
दिवामकरे हं हृदादिवामपादे लं क्षमिति व्यापकं अथ निवृत्त्यादिकलान्यासः अं निवृत्त्यै
नमः शिरसि आं प्रतिष्ठायै मुखे इं विद्यायै ईं शान्त्यै नेत्रयोः उं इंधिकायै ऊं दीपिकायै क
र्णयोः ऋं रेचिकायै ॠं मोचिकायै नासयोः लृं परायै ॡं सूक्ष्मायै कपोलयोः एं सूक्ष्मामृ
तायै ऐं ज्ञानामृतायै ० दंतपंक्त्योः ओं आप्यायिन्यै औं व्यापिन्यै ओष्ठयोः अं असुरायै स्वरूपा
यै जिह्वायां अः अनंतायै कंठे अथ दक्षिणकरे कं सृष्ट्यै खं ऋद्ध्यै ० गं स्मृत्यै घं मेधायै

ऊं कांत्यै० इति वामकरे चं लक्ष्म्यै छं धृत्यै जं स्थिरतायै झं स्थित्यै ञं सिध्यै० दक्षपादे टं जरायै ठं पा
लिन्यै डं शान्त्यै ढं ऐश्वर्यै० णं रत्यै० इति वामपादे तं कामिकायै थं वरदायै दं ह्लादिन्यै० धं प्रीत्यै०
नं दीर्घायै० इति पंक्ती तीक्ष्णायै फं रौद्र्यै बं कुक्ष्योः भं भ्रमयायै पृष्ठे मं निद्रायै नाभौ मं तन्द्रायै उ
दरे यं क्षुधायै हृदि० रं क्रोधिन्यै० कंठे लं कृपायै ककुदि वं उल्कायै स्कंधयोः शं मृत्यवे दक्षकु
रे षं पीतायै वामपादे सं श्वेतायै दक्षपादे हं अरुणायै० वामपादे लं असितायै मूर्द्धादिपादां
तं क्षं अनंतायै पादादिमूर्द्धांतं इति कलान्यासः ततो मूलेन त्रिप्राणायामं अस्य श्रीनवा ना
र्णमंत्रस्य ब्रह्मविष्णुरुद्रा ऋषयः महाकाली महालक्ष्मी महासरस्वती देवताः गायत्र्युष्णि
गनुष्टुप् छंदांसि नंदाजा शाकंभरी भीमाः शक्तयः रक्तदंतिका दुर्गा भ्रामरी बीजानि अ
ग्नि र्वायुः सूर्यस्तत्त्वानि जपपूजादौ विनियोगः अथैकादशन्यासः ह्रां बीजयुक्तान् शिव

अकारादिक्षकारांतान्वर्णान्वहिर्मातृकास्थानेषुन्यसेत् ह्रीं अं नमः सिरसि इत्यादि
प्रथमः श्रां ऐं ह्रीं क्लीं। बीजानि करहृदयेक निष्ठिकांतं छांते करतलकरपृष्ठमणिबंधे
षु च न्यसेत् ॐ ऐं ह्रीं क्लीं नमः कनिष्ठिकाभ्यां नमः इत्यादि एवं हृदयादिषडंगः एवं दशादि
क्षु न्यासानि द्वितीयः ॐ ऐं ह्रीं ऐं श्रां हेम वेहे माहेश्वर्यै आग्नेय्यां ॐ ह्रीं क्लीं कौमार्यै
दक्षिणे ॐ ह्रीं श्रीं वैष्णव्यै नैरृत्यां ॐ ह्रीं रू वाराह्यै पश्चिमायां ॐ ह्रीं इन्द्राण्यै वायव्ये
ॐ क्लीं नारसिंह्यै उत्तरे ॐ ह्रीं रः ॐ चामुण्डायै ऐशान्यां ॐ ह्रीं श्रीं महेश्वर्यै ऊर्ध्वे ॐ ह्रीं स
र्वब्रह्मपायेश्वर्यै भुवि ॐ नागेश्वर्यै पाताले इति तृतीयः सर्वत्रादौ प्रणवः श्रांत इत
येः पूर्वे स्तैर रक्तदंतिकायै दक्षिणांगे ह्रीं शाकंभर्यै पश्चिमांगे हूं दुर्गायै वामांगे हीं भीमा
यै मस्तकादिपादांतं श्रीं भ्रामर्यै पादादि शिरोंतं इति चतुर्थः ॐ ह्रीं ऐं ब्रह्मण्यै पादाग्रा

नाभिं ॐ ह्रीं श्रीं विरूपवे नाभेः एहृदयं ॐ ह्रीं ह्रीं हृदयाय हृदयाग्रशिरसं ॐ ह्रीं हंसाय घ हृदये
ॐ ह्रीं वैनतेयाय करद्वये ॐ ह्रीं वृषभाय चक्षुषोः ॐ ह्रीं गजेननाय सर्वांगे ॐ ह्रीं हरये व्या
पकं इति पंचमः ॐ ह्रीं महालक्ष्म्यै मध्यदेहं ॐ ऐं सरस्वत्यै ऊर्ध्वदेहं ॐ क्लीं महाकाल्यै
अधोदेहं ॐ ह्रीं क्रों सिंहाय हस्तयोः ॐ ह्रीं हंसाय नेत्रयोः ॐ ह्रीं रूं महिषप्रेताभ्यां न
मः पादयोः ॐ ह्रीं चंडिकायै सर्वांगे इति षष्ठः ६ ऐं नमः मूर्ध्नि ० ॐ ह्रीं नमो दक्षनेत्रे ॐ०
क्लीं वामनेत्रे ॐ चां दक्षकर्णे ॐ मुं वामकर्णे ॐ डां नासिकायां ॐ ऐं मुखे ॐ विं
लिंगे ॐ च्चे पापो ३ निसमः ॐ त्रे पापो ॐ विलिंगे ३ श्रैं पैं मुखे ॐ डां नासिकायां ॥
ॐ मुं वामकर्णे ॥ श्रीं चां दक्षिणकर्णे ॥ ॐ क्लीं वामकर्णे ॥ ॐ ह्रीं दक्षिणे ॥ श्रीं ऐं मू
र्ध्नि इति सप्तमः ॥ ऐं ह्रीं क्लीं चामुंडायै विच्चे इति स्वाहेति मूलमंत्रं स्वांगेन दक्षिणपश्चिम

वामांगेभुजमारोह्यवरेहाम्भ्यांशिरस्तःपादांतंपादादिशिरोंतेचसंस्मरेत्॥इतिनवमः॥पूर्वो
क्तसमस्तमंत्रेणहृदयादिषडंगः॥इतिदशमः॥ततःखड्गिनीशूलिनीघोरेत्येकंश्लोकमुच्चा
र्यहेमवर्णंध्यात्वाहृदयाय॥शूलेनपाहिनोदेवीतिश्लोकचतुष्टयंपठित्वारक्तवर्णं
ध्यात्वाशिरसेस्वाहा॥सर्वस्वरूपेसर्वेशेइतिश्लोकपंचकंपठित्वाश्वेतवर्णंध्यात्वा
शिखायैवौषट्॥इत्येकादशमाः॥ततोयोनिमुद्रांप्रदर्शयेत्॥साचैवंदक्षिणक
रस्यतर्जन्यावामस्यानामिकांवामतर्जन्यादक्षिणस्यानामिकांचधृत्वामध्यमांगु
लीयंतदग्रेकनिष्ठिकाद्वयंतदग्रेऽगुष्ठद्वयमिति॥अथध्यानं॥श्वेताननानीलभुजासु
श्वेतस्तनमंडलारक्तमध्यारक्तपादानीलजंघोरुरुन्मदासुचित्रजघनाचित्रमाल्यांबर
विभूषणाचित्रानुलेपनाकांतिरूपसौभाग्यशालिनी॥अष्टादशभुजापूज्यासा

सहस्रभुजासमनी॥ आयुधान्यत्रवक्ष्यंतेदक्षिणाधःकरक्रमात्॥ अक्षमालांचक्रमलं
वाणोसिःकुलिशंगदा॥ चक्रंत्रिशूलंपरशुःशंखोघंयचपाशकः॥ शक्तिर्दंडश्चर्म
चापंपानपात्रंकमंडलुरिति॥ ततोवेघांसर्वतोभद्रक्षावानत्रदेवताःस्थापयेत्॥ मध्येब्र
ह्मणःउत्तरादिसोमादीन्॥ वायुसोममध्यादिक्रमेणाजेकपादेतिवसून्॥ आरुद्राम
कृतिरुद्रान्॥ सोमसुक्षेत्रिपामिजिह्वस्थदिशान्॥ आश्विनावतिरित्याश्विनौ॥ आमि
त्यदेवमितिसप्तपक्षान्॥ आयंगौरितिसर्पान्॥ अप्सरसांगंधर्वाणामितिगंधर्वाप्स
रसः॥ ब्रह्मसोममध्येकुमारंमातेतिकुमारं॥ अबमंमेत्यपमं॥ आदिर्धजानिछाति
दक्षंचब्रह्मेंद्रमध्येनामग्निवरुणामितिदुर्गां॥ इदंविष्णुरितिविष्णुंच॥ ब्रह्माग्निम
ध्येनुदितरंनामिस्वधांब्रह्मयममध्येपरंमृत्योरितिमृत्युरेगान्॥ ब्रह्मसिं[illegible]तिम

ध्येगणानांस्वेतिगणपतिं॥ब्रह्मविष्णुमध्येशन्नोदेवीन्त्यपरः॥ब्रह्मवायुमध्येमरुतोयस्येति
मरुतः॥ब्रह्मणःपादमूलेस्योमतिभूमिं॥तत्रैवइमंमेगंगेतिगंगादिसप्तनदीः॥धान्ताधा
न्नइतिसप्तसागरं॥ध्रुवहिसोमादिसन्निधोक्रमेणगदाशूलंवज्रंशक्तिंदंडंखड्गंपाशंअंकु
शंचपुनरुत्तरादिगोतमंभरद्वाजंविश्वामित्रंकश्यपंयमदग्निंवशिष्ठमत्रिमरुन्धतींचपूर्वा
दिएंद्रीकौमारींब्राह्मींवाराहींचामुण्डांवैष्णवींमाहेश्वरींवैनायकीं॥ततस्तदस्तुष्यावाह
दिसंपूज्यबलिंदत्वातन्मध्येमहीद्यौरिति॥भूमिंस्पृष्ट्वाओषधयःसमितिसप्तधान्यानि
॥इमंमेगंगइतिउदकेनापू
र्णंकलशंक्षितिहेमराजतंताम्रमयंमन्मयंवाकलशंसंस्थाप्य
र्यगंधद्वारामिति॥याओषधीरितिसर्वौषधीः॥कांडात्कांडादितिदूर्वाः॥अश्वत्थेवइति
पंचपल्लवान्स्योनेतिसप्तमृदः॥याःफलिनीतिफलं॥सहिरत्नानीतिपंचरत्नानि॥हिरण्यंप
क्षिप्त्वायुवासुवासाइतिरक्तवस्त्रेसूत्रेणवावेष्ट्यापूर्णादर्वीतिपूर्णपात्रंनिधाय

चं
१५

न

तत्र रक्तवस्त्रे यंत्रं लिखेत्॥ यथा चतुर्द्वारं चतुरस्रं यंत्रं कृत्वा तन्मध्ये त्रिकोणं कृत्वा तत्पश्चिमा
द्यन्यत्रिकोणं कृत्वा पूर्वस्य पश्चिमरेखासंलग्नकोणमन्यत्रिकोणं कृत्वा तत्संलग्न
मन्यत्रिकोणं कुर्यात्॥ तेन वहिः षट्कोणमध्ये च षट्कोणः संपद्यते॥ तन्मध्ये चान्य
त्रिकोणं कृत्वा तत्संलग्नमन्यत्रिकोणमिति॥ उद्धारो यथा॥ यद्वा मध्ये त्रिकोणं तद्बहिः
तद्बहिः षट्कोणं तद्बहिः सवृत्तं तद्बहिः षोडशदलानि तद्बाह्ये चतुर्द्वारं चतुरस्रत्रयमिति॥ एवं
यंत्रं विलिख्य तत्र शातकौम्भहेमपलेन तदर्द्धेन वा तदर्द्धेन वा तदर्द्धेन वा कृतां॥ सहस्रचेमा सो
तुर्विंशतिदलपंचाननमसुवर्णेन कृतां ध्यानोक्तामष्टादशभुजां रहस्योक्तामष्टभुजां वा
महिषासुरहन्त्रीं सिंहस्थां देवीमूर्तिं पट्टदुकूलयुग्मच्छन्नां संस्थाप्य पूजयेत्॥ तद्यथा॥
स्ववामेऽस्त्राय फडिति क्षालितं मूलेन जलपूरितं कुंभं निधाय पुष्पाक्षतगंधादिभि शिव
मूलेन तत्साधारणमापूर्य्य देवदक्षिणे न्यसेत्॥ ततो मत्स्यमुद्रया त्रिकोणं तद्बहिः षट्कोण १५

त्रद्वहिंचतुरस्त्रंत्रत्रद्वाघेवृत्तंगोमयेनजलेनवाविलिख्यशंखमुद्रयाऽवष्टभ्यवन्हयेद
शकलात्मनेनमः।। धूम्रार्च्चिषे। ऊष्मायै। ज्वलिन्यै। ज्वालिन्यै। विस्फुलिंगिन्यै।। सु
श्रियै। सुरूपायै। कपिलायै। हव्यवाहायै। कव्यवाहायैनमः इत्यभ्यर्च्य। षट्कोणेष्व
ग्निमीतिवायुकोणेषु हृदयायनमः। शिरसेस्वाहा। शिखायैवषट्। कवचायहुम्
व मि।। अग्निनेत्रत्रयायवौषट् पूर्ववत्।। अस्त्रायफडिति अर्घ्यदानैः संपूज्य अस्त्रक्षालि
तंशंखंसंस्थाप्यहंसःसूर्यमंडलायद्वादशकलात्मने। तपिन्यै। तापिन्यै। धूम्रायै
मरीच्यै। ज्वालिन्यै। रुच्यै। सुषुमायै। भोगदायै। विश्वायै।। बोधिन्यै। धारिण्यै। क्षमा
यै। इतिसंखेऽक्षतैः संपूज्यतत्रगंधपुष्पाणि हृदयमंत्रेण क्षिप्त्वा क्षांनमः हंनमः।। इ
त्यादिविलोममात्रिकाभिः शिरोमंत्रेणमूलेनवापूर्य उँ सोममंडलायषोडशकलात्मने।।

श०चं अमृतायै। मानदायै। पूर्णायै। पूर्णामृतायै। कामदुघायै नमः। इत्यभिमंत्र्य अंकुशमुद्रया सूर्य
१० मंडलात्तीर्थमस्मात्भव्यावाहनादिमुद्राप्रदर्श्य शिवोमंत्रेण धेनुमुद्रां गालिनीमुद्रां
गरुडमुद्रां करद्वयांगुष्ठतर्जन्योन्यसंयोगेन गालिनीमुद्रा करद्वयस्य पृथक्संयोगे अंके
निष्ठानामिकेवष्टमाधोंगुष्ठे पुरस्तर्जन्यौ च संयोज्य मध्यमानामिकयोर्मुक्तयोः॥
पसंतुल्यत्वे गरुडमुद्रां च दर्शयेत्॥ तेन मंत्रेण संवीक्ष्य कवचमंत्रेण शकलोलम्य
तत्र षडंगानि विन्यस्यास्त्रेण रक्षां कृत्वा मूलेन गंधपुष्पैरभ्यर्च्य हस्तेनाच्छाद्य
मूलेन सप्तवारमभिमंत्र्य चक्रमुद्रया दर्शयेत जलम्॥ कुंभे क्षिप्त्वा स्वमंत्रेणात्मा
नं पूजाद्रव्याणि च संप्रोक्ष्य मूलेन षडंगन्यासं कृत्वात्मानं गंधपुष्पैरभ्यर्च्य मूलेन शिव
त्रिः स्वशिरसि पुष्पांजलिं दत्वा धूपदीपनैवेद्यानि मनसा निवेद्य देवताः स्थाप १०

दु

दु

परमगुरुभ्यः पंपरात्परगुरुभ्यः पंपरमेष्ठीगुरुभ्यः इति पूज्याग्नेयादिकोणेषु धर्माय ज्ञा
नाय वैराग्याय ऐश्वर्याय इति संपूज्य पूर्वादिदिक्षु ॥ अधर्माय अज्ञानाय अवैराग्याय।
अनैश्वर्याय। ऊर्द्ध्व ब्रह्मणे। अधः अनंताय मध्ये वास्तुपुरुषाय इति संपूज्य पूर्णगिरिपीठाय पूर्वा
घ ध्द दिक्षु उड्डीयणपीठेश्वरसहितमुड्डीयणपीठेश्वर्यं वा पादुकां पूजयामि ॥ श्रीं मां मातृकापी
पीठेश्वरसहितां मातृपीठेश्वर्यं वा पा० ॥ जैं जालंधरपीठेश्वरसहितां जालंधरपीठे
श्वर्यं वा पा० ॥ जैं कोल्लापीरिपीठेपीठेश्वरसहितां कोल्लागिरिपीठेश्वर्यं वा पा० ॥ जें
पूर्णगिरिपीठेश्वरसहितां पूर्णगिरिपीठेश्वर्यं वा पा० ॥ जैं सं संसारगिरिपीठेश्वरस
हितां संसारगिरिपीठेश्वर्यं वा पा० ॥ कां कामरूपीठेश्वरसहितां कामरूपीठेश्वर्यं वा पा०
पुनः पूर्वादि स्ववीज नमोंते: सर्वत्र गणेशाय० क्षेत्रपालाय० पादुकेभ्यः वटुकेभ्यः ॥ आ
ग्नेयादि ॥ जयायै। विजयायै। जयंत्यै। अपराजितायै। तत्रैव अग्निमुखवेतालाय०।

प्रेतवाहनवेतालाय० ज्वालामुखवेतालाय० धूम्राक्षवेतालाय० केरलाय० नालाय० दले
भ्यः केसरेभ्यः। कर्णिकायै। अं सूर्यमंडलाय। उं सोममंडलाय। मं वह्निमंडलाय॥ आं
आत्मने। अं अंतरात्मने। पं परमात्मने। ह्रीं ज्ञानात्मने॥ ततः विं मायायै। चं चेतनायै
बुं बुद्ध्यै। निं निद्रायै। क्षुं क्षुधायै० इति पूर्वे। छं छायायै। शं शक्त्यै०। तं तृष्णायै। क्षां क्षां
त्यै। जां जात्यै०। लं लज्जायै॥ इति दक्षिणे। शं शांत्यै। श्रं श्रद्धायै०। कां कांत्यै०। लं लक्ष्म्यै०
धं धृत्यै० वं वृत्यै० इति पश्चिमे। स्मं स्मृत्यै। दं दयायै०। तुं तुष्ट्यै०। पुं पुष्ट्यै। मौं मौक्तिकायै०। भ्रां मा६
भ्रांत्यै० इत्युत्तरे। ॐ ह्रीं सर्वशक्तिकमलासनाय० सर्वात्मसंयोगयोगपीठात्मने इति
पीठपूजां ततो हृदि ज्योतिर्मयीं सर्वपरिवारां महालक्ष्मीं ध्यात्वा। आगच्छ वरदे देवि
दैत्यदर्पनिषूदनि पूजां गृहाण सुमुखि नमस्ते शंकरप्रिये॥ दुर्गे देवि समागच्छ समा शिव
गच्छ सान्निध्यमिह कल्पय॥ बलिपूजां गृहाण त्वमष्टाभिः शक्तिभिः॥ सहेति ११

मंत्रंपठित्वादक्षिणनासारंध्रेणपुष्पांजलावानीयमूलेनमूर्त्तावावाह्यावाहनादिमुद्राः
योनिमुद्रांचप्रदर्श्यमूर्त्तेःषडंगंकृत्वामूलेनजयंतीमंगलाकालीत्यनेनचासनया द्यापा
चमनमधुपर्कान्निवेदयेत्॥ तत्रपात्रचतुष्टयमस्त्रेणप्रक्षाल्यगंधादिक्षिपेत्॥ तत्र
पाद्येदूर्वाविष्णुक्रांताश्यामाकपत्राणि॥ अर्घ्येगंधपुष्पाक्षतकुशाग्रसर्षपयवदूर्वाः
आचमनीयेजातीफलकंकोललवंगानि॥ मधुपर्केदधिमधुचततःसुगंधतैल
पंचामृतोष्णोदकैर्तीर्थोदकैःश्रीसूक्तदेवीसूक्तसरस्वतीसूक्तैरभिषिच्यपुनराचम
नंकृत्वापट्टकूलंयुग्मंकंचुकाभरणाद्यगंधबिल्वपत्रनानापुष्पहरिद्राकुंकुमसिंदू
रालक्तकपरिमलद्रव्याणिसमर्प्यपंचविंशतिदशत्रीणिसहस्राणिएकंवासहस्रं
पुष्पाणिसमर्पयेत्॥ अथावरणपूजा॥ दक्षिणेऐंमहाकाल्यैविच्चेनमःवामेक्लींस
रस्वत्यैविच्चेवाहूंममहिषायदक्षिणेमहालक्ष्म्यै॥ ॐ ब्रह्मणे ऐंसरस्वत्यै० तत्रैव॥

श०चं ह्रां हृदयाय० ह्रीं शिरसे स्वाहा० ह्रूं शिखायै० ह्रैं कवचाय० ह्रौं नेत्रत्रयाय० ह्रः अस्त्राय फ० तत्रैव॥
गुरुगुरुभ्यो० पं परमगुरुभ्यो० पं परमेष्ठिने० ह्र रयै० गं गणेशाय० दिक्षु ब्रां ब्राह्मयै० ओं इन्द्रा
१२ ण्यै० क्लौं नारसिंह्यै० च्रैं चामुण्डायै० दिक्षु अं असितांगभैरवाय० रुं रुरुभैरवाय० चं चंडभैरवा
य० क्रें क्रोधभैरवाय० उं उन्मत्तभैरवाय० कं कपालीभैरवाय० भिं भीषणभैरवाय० सं संहा
रभैरवाय० पूर्वादि लं इन्द्राय० रं अग्नये० मं यमाय० क्षं निर्ऋतये० वं वरुणाय० यं वायवे०
सं सोमाय० हां ईशानाय० वहिः वज्राय० शक्तये० दं दण्डाय० खं खड्गाय० अं अंकुशाय० गं गदायै० त्रिशूला
यं० ततो मूलेन धूपदीपौ दत्वा नैवेद्यमस्त्रेणाभिमंत्र्य मूलेन प्रोक्ष्य कवचेनावगुंठ्य पुष्पं दत्वा छं
धेनुमुद्रयामृतीकृत्य मूलेन निवेद्य ग्रासमुद्राप्रदर्शनं मध्येपानीयमुत्तरापोशनं नैवेद्यं दत्वा करो
द्वर्तनफलतांबूलदक्षिणानीराजनछत्रचामरदर्पणगीतवाद्यादि निवेद्य तस्मात्कृतेन
वरात्रनिर्णयोक्तविधिना माषभक्तकूष्माण्डादिबलिं दत्वा पूजां समर्पयेत्॥ अथ चतुः शिव
ष्टियोगिनीपूजा॥ तत्र देव्यग्रे रक्तवस्त्रे अष्टोमस्तौ रणोज्जैकापंक्तिः एवमष्टोत्तरसप १२

म

र्किः स्तवावस्य मालेनामभिराबाह्य संपूज्य पायसबलिं दद्यात्॥ शुल्कवर्णेश्शूलडम
रूपाशासिधरे सर्वालंकारभूषिते ससैन्ये जये एह्येहि गन्धं गच्छ मे पायसबलिं गृह्ण गृह्ण मम
प्सितं कुरु स्वाहा। एवं वीजये विजये नित्ये जयं त्र्य अपराजिते। दिव्ययोगिनी महायोगिनी सिद्ध
योगिनी गणेश्वरि। ततः गोरवर्णे क्षमालांकुशपुस्तकवीणाधरे प्रेतोपरि नि एह्येहि इ
मादि ग्राम्वत॥ एवं डाकिनी कालिका कालरात्रि निशा चरिटं कारि करि णि रुद्रवेता
लि फूत्कारिणि० वीरभद्रे० धूम्रांगि कलहप्रिये० ततो विद्युत्सन्निभे ध्वजवाराध
नुः पाशयुते रक्ष रिणि एह्येहि मादि० एवं रक्ताक्षी विश्वरूपे भयंकरि वीरकौमारि चण्डिके
वाराहि मुण्डधारिणि ततः आदित्यवर्णे कमलाक्षमाला भयवरकरे भैरवि एह्येहि मा
दि० एवं ध्वांक्षिणि धूम्रांगि प्रेतवाहिनि० खड्गिनि० लंबोष्ठि० मालिनि० मंत्रयोगिनि ततः
सुनीले शंखचक्रगदाभयकरे कालिनि एह्येहि मादि० एवं चक्रिणी कंकालिनि भुव
नेश्वरि त्रात किमहामारियमदूतिकरालिनि ततः पुंजनिभे खड्ग खेट पट्टिश प

श्रा॰वं
१३

रक्तहस्तेकेशिनिएह्येहिस्वाहा॥ एवंमर्दिनिरोमजयेनिवारिणिविशालिकामुक्तिलोलित्र
घोमुरिमननेधूम्रवर्णेकुंतखेटकेभिंदिपालमालाकरेमुंडाग्रधारिणीएह्येहिस्वाहा
एवंव्याघ्रकांक्षिणिप्रेतरूपिणिधूर्जटिघोरिकरालिवित्रलंविनिइतियोगिनि
पूजा॥ ततोगणपतयेनमः। वंवटुकायपिंगलभासुरनेत्रायवलिंगृह्णगृह्ण२स्रो
कदन२ह्रीं२स्वाहेतिवटुकायक्षेत्रपालायचदत्वाप्रभूतवलिंदद्यात्॥ तत्रमंत्रः
सर्वपीठोपपीठानिद्वारोपस्तरणेपिचक्षेत्रक्षेत्रज्ञसंदेहःसर्वेदिग्भागसंस्थिताः
योगिनीयोगवीजेष्टाःसर्वेयत्राःसमागताःनगरेवापवाग्रामेअटव्यांसरितस्त
टे॥ वापीकूपेषुवृक्षेचश्मशानेचचतुष्पथे। नानारूपधरायेचवहुरूपधराश्च शिव
ये॥ तेसर्वेचैवसंतुष्टावलिंगृह्णंतुमेसदा॥ शरणागतोस्म्यहंतेषांतेसर्वेममसु
दाः॥ वलिनानेनसंतुष्टाःप्रयच्छंतुममेप्सितं॥ सर्वकार्यंशांतिकुर्वंतुदोषाख्वं १३

नुसर्वदेशिः॥ अथ कुमारीपूजा॥ तासु प्रत्यहं शस्ते नव वा पूज्याः प्रोक्तलक्षणाः सर्वकार्येषु जपार्थि
न एव वर्णजा मता॥ लाभार्थे वैश्यवंशोत्था सुतार्थे शूद्रवंशजा॥ दारुणे चान्त्यजातोत्था पूजये
द्विधिना नरः॥ एकस्याः पूजया॥ तथा नवमितर्लभते भूमिमैश्वर्यं द्वित्रेण तु॥ एकवृद्ध्या लभे
त् क्षेत्रं एकैकेन श्रियं लभेत्॥ वृद्ध्यास्तु एकवर्षां तु पाकस्य पूजार्थे ताविवर्जयेत्॥ द्विधि स्फुटित
ही रोगिणीं रक्तपूयप्रसन्नां किंनंग जात्यधां के करं कारणां कुष्ठां तनुरोमशां वर्जयेत्सर्वकार्येषु दा र्व
सीगर्भसमुद्भवामिति॥ विशेषस्तु मत्स्ये तन्निर्णयसिंधौ ज्ञेयः॥ तत्र सुगंधतैलेनाभ्यंगं कार
यित्वालंकृतां पीठे उपविश्य देशकालौ स्मृत्वा अमुकफलसिद्ध्यर्थं अमुकशर्मणि कुमारीपू
जनं करिष्ये इति संकल्प्य मूलेन षडंगं कृत्वा मूलमंत्रमुच्चार्य मंत्राक्षरमयीं लक्ष्मीं मातृ
णां रूपधारिणीं नवदुर्गात्मिकां साक्षात्कन्यामावाहयाम्यहमिति आवाह्य आसनं पाद्यं च द
त्वा हेमादकेन पादौ प्रक्षाल्य अर्घ्याचमन स्नान पट्टकूलवस्त्रं कंचुकालंकारादि दत्वा सु

श्री. गंधेनानुलिप्य हरिद्राकुंकुमसिंदूरालक्तककांचनपुष्पमालाभिरभ्यर्च्य धूपदीपोदनापा
१४ यसनानामद्यैर्भोजयेत् ॥ भोजनकाले च मूलमंत्रं सप्तशतीं वा पठेत् ॥ ततो नानाफल
तांबूलदक्षिणानीजनपुष्पांजलिं दद्यात् ॥ एवमन्याः पूजयेत् ॥ आवाहने तु मंत्रभेदः
मंत्राक्षरमयीमिति सर्वत्रोक्त जगत्सूमे जगद्धेतु सर्वशक्तिस्वरूपिणि ॥ पूजां गृहाण कौमा
रि जगन्मातर्नमोस्तु ते ॥ इति प्रथमाम् ॥ त्रिपुरां त्रिगुणाधारां ज्ञानमार्गस्वरूपिणीं ॥
त्रैलोक्यवंदितां देवीं त्रिपुरां पूजयाम्यहमिति द्वितीयां ॥ कालिकां तु कलातीतां कारुण्यैकप
रां शिवाम् ॥ कल्याणजननीं नित्यां कल्याणीं पूजयाम्यहमिति तृतीयाम् ॥ अणिमादि
गुणोदारां मकाराद्यक्षरात्मिकाम् ॥ अनंतशक्तिसहितां कामाक्षीं पूजयाम्यहमिति च
तुर्थीं ॥ कामचारां महामायां कारुण्यहृदयाश्रिताम् ॥ कामदां करुणोदारां रोहिणीं पूजया शिवः
म्यहमिति पंचमीं ॥ चंडवीरां चंडमायां चंडमुंडप्रभंजनीं ॥ ब्रह्मेशविष्णुनमितां चंडि १४

कां पूजयाम्यहमिति षष्ठी ॥ सुवर्णालंकरांशंगतां सर्वदेवनमस्कृतां ॥ सर्वभूतात्मिकां देवीं शो
भनवीं पूजयाम्यहमिति सप्तमी ॥ सुंदरीं स्वर्णवर्णाभां सुखसौभाग्यदायिनीं । संतोषजन
नीं देवीं सुभद्रां पूजयाम्यहमिति अष्टमी ॥ दुर्गमे दुस्तरे कार्ये भयशोकविनाशिनीं । पूज
यामि सदा भक्त्या दुर्गां दुर्गार्तिहारिणीं इति नवमी ॥ ततो बालरा सुवासिनीपूजा एवं दे
वीकुमार्यादिपूजा नवरात्रेपि प्रत्यहं कार्या ॥ इयं शतचंड्यां दिनचतुष्टयं ब्राह्मणाद्विवृद्ध्या
कार्या सहस्रचंड्यां दशोत्तरादिवृद्धिः ॥ ततः पूजां देव्यै समर्प्य सर्वे विप्राः कृतांगन्यासाः श
तं नवार्णमंत्रं जप्त्वा अथ कवचार्गलाकीलकानि सकृज्जप्त्वा सप्तशतीं जप्त्वा तेरहस्यं नवार्ण
स्य शतं जपेत् ॥ कवचादीनां प्रत्यावृत्ति नावृत्तिः एवं ऋत्विजः प्रत्येकं प्रथमे एकं ० द्वितीये ०
द्वितीये त्रीणि ० चतुर्थे चत्वारि रूपाणि एवं जपं कुर्युः ॥ ऋत्विजां कर्तुश्च प्रत्यहं क्षीरमात्राश
नमशक्तो हविष्याशनं वा प्रत्यहं सहस्रं शतं वा ब्राह्मणान्भोजयेत् ॥ पंचमेन्हि होमः ॥

श्री. नवरात्रेतुनवम्यामेवहोमः ॥ अथहोमः ॥ तत्रस्वगृह्योक्तस्यआगमोक्तेतत्रस्यचसमुच्चयः ।
१५ गृह्योक्तंकृत्वाआगमोक्तंकुर्यात् ॥ यथादेशकालोस्मत्वाब्राह्मणद्वाराकृतस्यनवचंडी
शतचंडीसहस्रचंडीनाममम्मतमजपस्यसंपूर्णतास्थित्यर्थंसिध्यर्थंदशांशेनतिलमिश्र
पायसद्रव्येणहोममहंकरिष्ये ॥ तदंगकुंडसंस्कारग्निस्थापनादिकरिष्ये ॥ इतिसंकल्प्यमूले
नकुंडंवीक्ष्यास्त्रेणसंरक्ष्यतेनैवदर्भैःसंताड्यकवचेनाभ्युक्ष्यास्वत्थसमिधामूलेनप्राग
ग्राउदगग्राश्चतिस्रोरेखाःकृत्वाप्रागग्रासुविद्यमीशाशक्रान्तउदगग्रासुब्रह्मयमचं
द्रानभ्यर्च्यमध्येन्यस्त्रवट्कोणष्टदलंकृत्वामूलेनाभिमंत्र्यधेनुमुद्रांप्रदर्श्यास्त्रे
णसंधक्ष्यकवचेनावधूपगंधधैःसंपूज्यमूलेनप्रतिष्ठाप्यअर्चयेत् ॥ तपिंगलेहनदहपचरद
हदसर्वाज्ञांज्ञापयस्वाहा इतिज्वलिनींमुद्रांप्रदर्श्यइंधनैसमिधाक्षेपेणदर्व्याःकंफंरं शिवः
वध्वाग्नेगर्भाधानादिसंस्कारंकुर्यात् ॥ प्रतिसंस्कारंमूलेनाज्येनत्रिर्जुहुयात् ॥ १५

न

नामकर्माणितुशतमंगनामासित्वहुताशनेतिनामकृत्वायुहुयात् ॥ अग्नेर्देहन्यासः ॥ ॐ ष्रूंप
मरागायै० अग्निजिह्वायैलिंगे० ॐ ष्रूंसुवर्णायैहृदये० ॐ ष्रुंभद्रलोहितायैशिरसि०
ॐ ष्रूः लोहितायैमुखे० ॐ ल्म्रूंश्वेतायै० घ्राणे ॐ म्रूंधूमिन्यैनेत्रयोः ॐ करालायै० सर्वांगे०
सहस्त्रार्चिषेहृदयाय० स्वस्तिपूर्णान्दर्शयेत् ॥ ज्ञ नस्तिष्ठन्मौनीवन्हेः तिस्रः समिधोध्या
धाययामद्दक्षिणयोरिडादिपिंगलमध्येसुषुम्नाचध्यात्वाचक्षुषीहुत्वाग्नौबोमाभ्याम
ध्येऽग्नयेस्विष्टकृतेचमध्येहुत्वापूर्वोक्तैरसजिह्वादिमूर्त्तिस्तन्मंत्रैरेकैकमाज्याहुतिंहु
भ्यो त्वामत्स्येभ्यः पितृयक्षेभ्योनागेभ्योहुत्वाचचरुंगृहीत्वावैश्वानरजातवेदः इहावह
लोहिताक्षसर्वकर्माणिसाधयस्वाहावौषट्इतिहुत्वागणेशमंत्रेणजुहुयात् ॥ ततः
पूर्वोक्तमासांगत्वावन्हेःपीठपूजांकृत्वादेवीमावाह्यवाहनादिमुद्राःप्रदर्श्यषडंगंकृ
त्वाषोडशोपचारैःसंपूज्यमूलेनशतमेकादशाधिकमाज्याहुतीर्हुत्वानवग्रहेभ्यो

श्रा०
१६

लोकपालेभ्यश्चतन्मंत्रैःसमिदाज्यचरून्हुत्वापायसतिलपलाशपुष्पसर्षपपूगीफल
लाजांपूर्वांकुरयवबिल्वफलरक्तचंदनगुग्गुलुद्रव्याणितिलमिश्रंपायसमेववाकेवलंवा गो
लोकीलकरहस्मैःप्रतिश्लोकंहुत्वाष्टलतअष्टतस्रजपस्यदशांशेनप्रतिश्लोकंसप्तशतिमं
त्रैर्लोकद्रव्याणितिलपायसंवजुहुयात्।।अथपायसमाज्यवाचस्थलेचपत्रपुष्पफले
होमः।।यद्वानमोदेव्याइत्यनेननवार्णेनवाजपदशांशेहोमः।।एवंप्रधानहोमंकृत्वा
नामभिर्भुवेरण्याज्यपायसंवजुहुयात्।।यथाकाश्वर्यस्वा०उल्काये०करालै०रक्तदंसे०
शिवकौमार्ये०हरिनाथे०यदिरोप्य०कंकाल्ये०सुरश्रेष्ठाये०सर्वारम्भे०ब्राह्म्ये०माहेश्वर्ये०
कुमार्ये०वैष्णव्ये०वाराह्यै०ऐन्द्र्यै०नारसिंह्यै०चामुण्डाये०धात्रेविधात्रे०शंखनिधये०
पद्मनिधये०द्वारश्रियै०वास्तुपुरुषाय०ऐरावताय०पुंडरीकाय०वामनाय०कुमुदाय०
अंजनाय०पुष्पदन्ताय०सार्वभौमाय०सुप्रतीकाय०दमनकाय०पुंडरीकाय०तम्र शिवः
लाय०कुरंटकाय०ऋग्वेदाय०यजुर्वेदाय०सामवेदाय०अथर्ववेदाय०नवग्रहा २६

लं दिक्पालानां वा नाममिः असितांगभैरवाय० रुरुभैरवाय० ततः पूर्वोक्तआधारशक्त्या
दिपीठदेवताभ्य आवरणदेवताभ्यश्च हुत्वा स्विष्टकृतं हुत्वा ॐ ब्राह्मी माहेश्वरी वैष्णवी वारा
हीनारसिंहैन्द्री चामुण्डायै विच्चे स्विष्टकृते स्वाहेति स्विष्टकृतं हुत्वा जुहुयात्॥ ॐ ह्रीं नन्दायै वि
च्चे स्वाहा ॐ ह्रीं रक्तदन्तिकायै विच्चे० ॐ ह्रीं शाकम्भर्यै विच्चे० ॐ ह्रीं दुर्गायै विच्चे० ॐ ह्रीं भीमा
यै विच्चे० ॐ ह्रीं भ्रामर्यै विच्चे० ॐ ह्रीं कालिकायै विच्चे० ॐ ह्रीं शिवदूत्यै विच्चे० ॐ ह्रीं प्रजाप
तये स्वाहेति हुत्वा प्रायश्चित्तहोमान्ते दिक्पालनवग्रहविनायकादि क्षेत्रपालादिभ्यो माष
भक्तं दत्वा दशग्रहेति तेन समुद्रादूर्मिरिति त्र्यचेन मूर्द्धानं दिवः पुनस्त्वादित्याः पूर्णा
दर्वि सप्त ते धाम सहस्रेतैः मूलेन च पूर्णाहुतिं दत्वा इदमग्नये वैश्वानराय वसुरुद्रादित्येभ्यः
शतक्रतवे सप्तवते महालक्ष्म्यै च न मम इति त्यजेत्॥ ततो वसोर्धारां हुत्वा संस्रवान्प्राश्य प्रणी
ता विमोकादि कर्मशेषं समाप्य मूलमन्त्रेण होमदशांशेन दुग्धेन जलेन वा तर्पयित्वा

शा. तद्दशांशेन मार्ययेत्॥ ततः संपाद्या[illegible]चार्यादीन्स्वर्णैर्धेः सपूज्याचार्याय शतं तदर्धं तदर्धं अ
१७ र्द्धौ च गोमिथुनानि सुवर्णं चतुष्टयं च दद्यात्॥ ब्रह्मरोगनिष्कद्वयं गोद्वयं च॥ ऋत्विग्भ्यः प्रत्येकं
निष्कत्रयं गोमिथुनं च दद्यं सहस्रं चं ज्ञां तदर्धं शतं चं ज्ञां तदर्धं नव चं ज्ञां ब्रह्मणेभ्यः सर्वेभ्यः सु
वर्णं ततो दानान्याचार्यादिभ्योऽन्येभ्यो दद्यात्॥ यथाविप्रं संपूज्य कपिलां गां स्वर्णशृंगीं रौ
प्यखुरां ताम्रपृष्ठां कांस्यदोहनीं सवस्त्रां संपूज्य॥ कपिले सर्वभूतानां पूजनीयासि रोहिणी
तीर्थदेवमयी यस्माद् अतः शांतिं प्रयच्छ मे इति मंत्रेण दद्यात्॥ यथा रत्नेषु सर्वेषु सर्वे देवा व्य
वस्थिताः तथा शांतिं प्रयच्छं तु रत्नदानेन मे सुराः इति नीलमणिं॥ अथ अश्वदानम्॥
विप्रं संपूज्य अश्वं हेमपल्याणरौप्यकंटकगजदंतवस्त्रनेत्रताम्रमयखुरसौमपुच्छस्वर्णल
लाटपट्टसुकरास्वायुधैर्ब्बेष्टसवस्त्रयुतं धान्यरत्नोपरिस्थं कृत्वा मार्तंडाय सुधवेगा शिवः
यकाश्यपात्मिमूर्तये जगद्दीपाय सूर्याय त्रिविदाय नमो नमः॥ इमं सुकोमलं सुकर्मतो १०
नि

मुकशाखाध्यायिने सूर्यलोकनिवासकामनया देवीप्रीतिकामनया वा इमं श्वेतं शंखं तुभ्यम
हं संप्रददे न मम ॥ सुवर्णकांकरं गौविप्रहस्ते दत्वा मंत्रं पठेत् ॥ महार्णवसमुत्पन्न उच्चैःश्रवसपुत्र
क ॥ मया त्वं विप्रमुख्याय दत्तो हय सुखी भव ॥ इमं विप्र नमस्तुभ्यं अश्वं तत्प्रतिपादितम् ॥ प्रीति
न्हृष्व विप्रेंद्र मया दत्तो सुखेन मनमिति ॥ ततः सुवर्णं दक्षिणां दद्यात् ॥ ततश्छत्रमुत्रानप
त्राणं कुरु केशव मे प्रभो ॥ छत्रेणाव स्त्रीतये दत्तं ब्राह्मणाय मया सहेति छत्रम् ॥ शशां
ककरसंकाश हिमकुंदरपांडुर ॥ प्रोत्सारयाशु दुरितं चामरामरवल्लभेति चामरम् ॥
सर्वसस्याश्रया भूमिर्वराहेण समुद्धृता ॥ अनंतसस्यफलदा अतः शांतिं प्रयच्छ तु ॥
इति भूमिं ॥ यथा नेत्त्लभेशयनं शून्यं सागरजातया ॥ शय्या ममाप्यशून्यास्तु तथा जन्म
नि जन्मनि ॥ इति शय्याम् ॥ तृप्तिं करोति भूतानामिह लोके परत्र च ॥ तस्मात्प्रदीय
ते धान्यमतः शांतिं प्रयच्छ मे ॥ इति सप्तधान्यानि च दद्यात् ॥ ततो द्वारजापकेभ्योऽन्ये

पि

दु०
१८

मन्त्रं दद्याद्दक्षिणे ॥ ततः सर्वकलशोदकेन सामन्त्रितं यजमानं समुद्रज्येष्ठा इत्याद्यैः सुरास्त्वा
मभिमाद्यैर्वारुणैश्चाभिषिंचेयुः ॥ ततो यजमानो नवग्रहाणामुत्तरपूजां कृत्वा विसृज्या च
र्यहस्ते दत्त्वा देवीं संपूज्य बलिं दद्यात् ॥ तत्र क्षत्रियादीनां चैमेषच्छागमहिषाणामन्यतरं
दद्याद्विप्राणां तु कूष्माण्डं विल्वमिक्षुं वा दद्यात् ॥ यथा देवीं द्विजपुष्पा विल्वाम्रदलं जानी
पंचकैः संपूज्य ॐ दक्षमुखः कालीपूर्वं मुखं देवीमुखं वा बलिं गंधादिनाभ्यर्च्य पशुस्त्वं बलिरू
पेण मम भाग्यादुपस्थितः ॥ प्रणमामि ततः सर्वरूपिणं बलिरूपिणम् ॥ चण्डिका प्रीतिदा
नदानाद्दुर्विपद्विनाशनम् ॥ चामुण्डा बलिरूपाय बले तुभ्यं नमोस्तु ते ॥ यज्ञार्थे बलयः
सृष्टाः स्वयमेव च स्वयंभुवा ॥ अतस्त्वां घातयाम्यद्य तस्माद्यज्ञे वधोऽवधः ॥ इत्यभि
मंत्र्य ऐं ह्रीं श्रीं इति तत्र पुष्पं क्षिप्त्वा रसनां त्वं चण्डिकायाः सुरलोकप्रसाधकः ॥ ह्रीं हुं खड्गः श्रीं
हुं फट् इति खड्गमस्त्रमन्त्रेण संपूज्य । ॐ कालि कालि वज्रेश्वरि लोहदण्डायै नमः ॥ इति छि शिवः
दयित्वा । ॐ ह्रीं ऐं ह्रीं कौशिकी रुधिरेणाप्याययामीति देव्यै निवेदयेत् घं गृहीत्वा १८
लि

पूतनायै चरक्यै० पापराक्षस्यै च निवेदयामि बलिपिच्छमयं शत्रुं छित्वा खड्गेन छेदयित्वा स्कन्दाय विशाखाय च दत्वा बलिशेषं रक्षोभ्यो हरेत् ॥ मंत्रस्तु ॐ ह्रीं स्फुर २ कुंभ २ सून २ तनु २ धनु २ मारय २ विद्रावय २ कंपय २ जापय २ पूरय २ ॐ ह्रीं ॐ ह्रीं फट् २ हूं मर्दय २ हूं इति ॥ ततः शेषेण वहिर्द्द्यात् ॥ तत्र मंत्रः बलिं गृह्णंत्विदं देवा आदित्या वसवस्तथा ॥ मरुतोऽथाश्विनौ रुद्राः सुपर्णाः पन्नगा गृहाः ॥ असुरा यातुधानाश्च पिशाचोरगराक्षसाः ॥ डाकिन्यो यक्षवेताला योगिन्यः पूतनाः शिवाः ॥ जंभकाः सिद्धगंधर्वा माला विद्याधरा नगाः ॥ दिक्पाला लोकपालाश्च ये च विघ्नविनायकाः जगतां शान्तिकर्त्तारो ब्रह्माद्याश्च महर्षयः ॥ मा विघ्नं मा च मे पापं मा सन्तु परिपंथिनः ॥ सौम्या भवंतु तृप्ताश्च भूतप्रेताः सुखावहाः इति ॥ ततः स्नात्वा तिलकं

श्री.
१९

गोप्त्रीत्वंगृहाणास्मत्कृतंजपं ४

सि देहि

खत्वारखड्गिनीशूलिनीत्येकेनशूलेनपाहिनोदेवीति चतुष्टयेननमोदेव्या इतिपंचकेनप्रार्थ
येत्॥रूपंदेहिवसोदेहिभगंभगवतिदेहिमाम्॥पुत्रान्देहिधनंदेहिसर्वान्कामांश्चदेहिमे॥
सुर महिषघ्निगोप्त्रीत्वंगृहाणास्मत्कृतंजपं॥ध्रिंमहामायेचामुंडेमुंडमालिनि॥आयुरारोग्यमैश्व
र्यंदेहिदेविनमोस्तुते॥ततोगन्धादिग्रहणं॥१॥सिद्धिर्भवतुमेदेवित्वत्प्रसादाज्जनवसुंदरातिदेवैनि
वेघमूलेनपुष्पेणदेवीमुद्रास्यनासयाहृदिप्रविष्टांविभाव्यषडंगंकृत्वा उत्तिष्ठमुत्याप्य
गच्छगच्छेतिविसर्ज्याचार्यायदत्वामंत्रंपठेत्॥त्रैलोक्यमातर्देवित्वं सर्वं सर्वभूतदयान्विते॥
दानेनानेनसंतुष्टासुप्रीतावरदाभवेति॥नवरात्रेतुविशेषः दशम्यांदेवींविसर्जयेत्॥मंत्रस्तु॥
उत्तिष्ठदेविचंडेशिशुभांपूजांप्रगृह्यचकुरुष्वममकल्याणमष्टाभिःशक्तिभिःसहगुत्याप्यंग
च्छगच्छपरंस्थानंस्वस्थानेदेविचंडिके॥व्रजस्रोतोजलंवृद्ध्यैस्थीयतांचजलेत्विह॥ शिवः
दुर्गेदेविजगन्मातःस्वस्थानंगच्छपूजिते॥संवत्सरेव्यतीतेतुपुनरागमनायवै॥इमां १९

ण

श.
२० पूजां मया देवी यथाशक्त्योपपादितां ॥ रक्षार्थं त्वं समादाय व्रज स्वस्थानमुत्तममिति जले (मा)
नयवाहयेत् ॥ ततोग्निं संपूज्य विभूतिं धृत्वा गच्छ गच्छेति विसृज्य सहस्रचंड्यां सहस्र
मन्यत्र शतं यथाशक्ति वा विप्रान् संभोज्य ॥ यस्यस्मृत्या प्रेह्य कुर्वतामिति ॥ जपित्वा पू
र्तितां वा चयित्वा कर्मेश्वरार्पणं कृत्वा सुहृद्युतो भुंजीत इदमेव पूजाहोमबल्यादिविधा
नं नवरात्रेपि ज्ञेयं ॥ विशेषस्तु मत्कृते निर्णयसिंधौ नवरात्रनिर्णये ज्ञेयः ॥ इति श
तचंडीसहस्रचंडीप्रयोगः ॥ इति कमलाकरभट्टकृतः शांतिरत्नः ॥ संवत् १८०६
मिति चैत्रशुक्लैकादश्यां गुरुवासरे ॥ राम राम राम राम राम राम राम

शिव:
२०

= इति शतचण्डी सहस्रचण्डी प्रयोगविधिः =